© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# अलङ्कारैतिह्यविवेचनपुरस्सरं मल्लिकामकरन्दप्रकरणेऽनुप्रासालङ्कारविमर्शः



**श्वेता अवस्थी**

**(शोधच्छात्रा)**

**राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ**

**शोधलेखसारः** - अलं भूषणपर्याप्तिवारणेषु इति भ्वादिगणपठिताद् अल् धातोरम्प्रत्यये कृतेऽलमितिशब्दऽ- मरकोषस्य रामाश्रम्यां व्युत्पादितः।अस्य व्युत्पत्तिलभ्योऽर्थो भूषणं वारणं पर्याप्तिश्च। संस्कृतकाव्येषु रस-गुण-रीति-वृत्ति-ध्वनिप्रभृतयः सर्वे पदार्थाः अलङ्कारवाचका एव काव्यसौन्दर्यधायकत्वात्।एतदर्थमलङ्कार एव काव्यस्यात्मस्थानीयं तत्त्वमस्ति काव्यसौन्दर्यसम्पादकत्वात्।संस्कृतकाव्येषु रस-गुण-रीति-वृत्ति-ध्वनिप्रभृतयः सर्वे पदार्थाः अलङ्कारवाचका एव काव्यसौन्दर्यधायकत्वात्।एतदर्थमलङ्कार एव काव्यस्यात्मस्थानीयं तत्त्वमस्ति काव्यसौन्दर्यसम्पादकत्वात्। अलङ्कारवादिनः आचार्याः स्वस्व ग्रन्थे अलङ्कारतत्वस्य महत्त्वं प्रतिपादितवन्तः।तत्र आनन्दवर्धनाचार्येण स्वीये ध्वन्यालोकनाम्नि ग्रन्थे ध्वनिसिद्धान्तः प्रतिपादितः। तेन काव्ये अलङ्काराणामेकछत्रं साम्राज्यमपसार्य काव्यात्मा ध्वनिरिति मतं प्रतिपादितम्।परं कथमपि एतन्नैव वक्तुं शक्यते यत् तेन अलङ्काराणां महत्त्वं न्यूनीकृतम्।

**मुख्यशब्दाः** - अलङ्कारः, काव्यम्, मम्मटः, मल्लिकामकरन्दः, ध्वनिः।

अलं भूषणपर्याप्तिवारणेषु इति भ्वादिगणपठिताद् अल् धातोरम्प्रत्यये कृतेऽलमितिशब्दऽ- मरकोषस्य रामाश्रम्यां व्युत्पादितः। अस्य व्युत्पत्तिलभ्योऽर्थो भूषणं वारणं पर्याप्तिश्च। अलम् पूर्वकात् कृधातोर्घञ्प्रत्यये कृतेऽलङ्कारशब्दो निष्पद्यते।एवमलङ्कारशब्दस्य मूले सौन्दर्यं सौन्दर्यस्य साधनं पर्याप्तिरूपा पूर्णता दोषवारणं चेत्यर्थाःसन्निहिताःसन्ति।घञ् यदि भावे मन्यते तदालङ्कारशब्दस्य सौन्दर्यमर्थः,यदा करणे मन्यते तदा अलङ्क्रियतेनेन इति व्युत्पत्या - लङ्कारशब्दःसौन्दर्यसाघनेषु कटकादिषु काव्योपमादिषु च वर्तते।अयमाशयो वामनेन सौन्दर्यमलङ्कारः इत्यादिवचनेन प्रतिपादितः। कुन्तकेन अलङ्कारशब्दःशरीरस्य शोभातिशयकारित्वान्मुख्यतया कटकादिषु वर्तते।तत्कारित्वसामान्यादुपचारादुपमादिषु तद्वदेव गुणादिषु।

संस्कृतकाव्येषु रस-गुण-रीति-वृत्ति-ध्वनिप्रभृतयः सर्वे पदार्थाः अलङ्कारवाचका एव काव्यसौन्दर्यधायकत्वात्।एतदर्थमलङ्कार एव काव्यस्यात्मस्थानीयं तत्त्वमस्ति काव्यसौन्दर्यसम्पादकत्वात्। अलङ्कारवादिनः आचार्याः स्वस्व ग्रन्थे अलङ्कारतत्वस्य महत्त्वं प्रतिपादितवन्तः।तत्र आनन्दवर्धनाचार्येण स्वीये

ध्वन्यालोकनाम्नि ग्रन्थे ध्वनिसिद्धान्तः प्रतिपादितः। तेन काव्ये अलङ्काराणामेकछत्रं साम्राज्यमपसार्य काव्यात्मा ध्वनिरिति मतं प्रतिपादितम्।परं कथमपि एतन्नैव वक्तुं शक्यते यत् तेन अलङ्काराणां महत्त्वं न्यूनीकृतम्। अलङ्काराणां लक्षणं तेनेत्थं कृतम्-

**तमर्थमबलम्बन्ते येऽङ्गिणं ते गुणाः स्मृताः।**

**अङ्गाश्रितास्त्वलङ्कारा: मन्तव्याः कटकादिवत्॥**[1]

आनन्दवर्धनमते यस्यालङ्कारस्य प्रयोगो रसाक्षिप्ततया क्रियते, अपि च यो विना पृथग् यत्नेन निष्पन्नो भवति स एवालङ्कारो ध्वनिकाव्ये अभिमतोऽस्ति। अलङ्काराः रसाभिव्यक्तौ उपयोगिनो भवन्ति। औचित्यानुरूपं यद्यलङ्काराणां योजना क्रियते तर्हि सर्वोप्यलङ्कारवर्गो ध्वनिरभिव्यक्तौ उपयोगी भवति।

काव्यमीमांसाकारेण राजशेखरेण सप्तमवेदाङ्गरेणालङ्कारः प्रतिष्ठापितो, यथा च तेनोक्तंम्-उपकारकत्वात् अलङ्कारः सप्तमङ्गम्। इति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद् वेदार्थानवगतिः।अलङ्कारज्ञेनैव काव्यस्योन्मीलनं भवति।

कुन्तकाचार्येण वक्रोक्तिजीविते काव्यस्वरूपनिर्धारणावसरे अलङ्काराणां महत्त्वं स्फुटीकृतम्-

**अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते।**

**तदुपायतया तत्त्वं सालङ्कारस्य काव्यता॥**[2]

सालङ्कारस्य शब्दार्थयुगलस्य काव्यता भवतीति प्रतिपादयन् स काव्येष्वलङ्काराणां महत्त्वं स्वीकरोति। औचित्यसिद्धान्तस्य प्रतिष्ठापकाचार्यक्षेमेन्द्रस्य मते औचित्यमभिलक्ष्य कृतोऽलङ्कारप्रयोगः काव्ये महत् सौन्दर्यमुद्भावयति।

भोजराजेन काव्यशोभाकरत्वेन अलङ्काराः एव। अत एव भोजराजः त्रिविधमलङ्कारवर्गं स्वीकरोति। त्रिविधः खल्वलङ्कारवर्गः वक्रोक्तिः, स्वभावोक्तिः, रसोक्तिरिति।तत्र उपमाद्यलङ्कारप्रधाने वक्रोक्तिः, श्लेषादिगुणप्राधान्ये स्वभावोक्तिः, विबावानुभावव्यभिचारिसंयोगात्तु रसनिष्पत्तौ रसोक्तिरिति।

अनेन परिलक्ष्यते यत् भोजराजः तानि सर्वाणि तत्त्वानि अलङ्गारपदवाचकानि स्वीकृतानि यैः काव्येषु सौन्दर्यस्यागमनं भवति। अनेन प्रतिभाति यत् भोजराजः अलङ्कारसिद्धान्तस्य पोषक एव। मम्मटाचार्चः काव्यप्रकाशे वक्ति-

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**

**हारादिवदलङ्कारास्तेनुप्रासोपमादयः॥**[3]

अर्थात् ये धर्माः अङ्गद्वारेण, अङ्गिनो रसस्याङ्गभूतौ शब्दार्थौ तद् द्वारेण तदुत्कर्षजननमुखेनाङ्गिनं रसं सन्तं जातुचित् कदाचित् न तु नियमेनेति यावदुपकुर्वन्ति,उत्कर्षयन्ति,ते धर्माः, अनुप्रासोपमादयोऽलङ्काराः। तत्र शब्दद्वारेण,अनुप्रासादयः, अर्थद्वारेण उपमादयः।

रसप्रस्थानपोषको विश्वनाथाचार्यः उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः इति प्रतिपादयन् काव्यात्मभूतस्य रसस्योत्कर्षहेतुत्वेन काव्येऽलङ्काराणां महत्त्वं स्वीकरोति। साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारान् विस्तरेण विवेचयति-

**शब्दार्थयोस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत्॥**[4]

यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथानुप्रासादयः शब्दार्थशोभातिशायिनो रसादेरूपकारकाः। मम्मटोत्तरवर्तिषु काव्यशात्त्रीयाचार्येषु जयदेवस्य विशिष्टं स्थामस्ति। असावलङ्कारसिद्धान्तस्य पक्षपाती आचार्योऽस्तीति मन्यते। तन्मतेऽलङ्कारहितं शब्दार्थयुगलं तथैव अकाव्यत्वप्रयोजकं यथा उष्णतां विना अनलम् अनलं नैव भवितुं शक्यते।अर्थात् अलङ्कारराहित्ये सति काव्यताऽपि नैव भवितुं शक्नोति।

अलङ्कारविवेचनपरम्परा पण्डितराजजगनानाथपर्यन्तं प्रचलिता दृश्यते। यथा क्रमशः अलङकारसम्प्रदायस्य विवेचकास्समर्थकाः वा ये आचार्याः उल्लेखनीयाः सन्ति ते तु भामह दण्डि-उद्भटरूद्रटवामनप्रतिहारेन्द्ररूय्यकभोजराजमम्मटविश्वनाथपण्डितराजजगन्नाथप्रभृतयः। अलङ्कारपरम्परा निखिलेऽपि साहित्यशास्त्रे स्वकीयं महत्त्वं भजति।लोके कटककुण्डलादयः शरीरं विभूषयन्ति अलङ्काराश्च कथ्यन्ते।अलङ्काराः शब्दार्थद्वारेण द्विधा विभज्यते।अनुप्रासादयःशब्दालङ्कारा उपमादयश्चार्थालङ्काराः। सम्बन्धेऽस्मिन् भोजस्य कथनं विवेचनश्चोल्लेखनीयम्। यथा- ये व्यत्पत्यादिना शब्दमलङ्कर्तुमिह क्षमाः शब्दालङ्कारशब्दास्ते। एवम् अलमर्थमलङ्कर्तुं यदव्यत्पत्यादिवर्त्मना ज्ञेयाः जातायादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया।अतः प्रतीयते यदलङ्काराः काव्यशोभाधायकाः वैचित्र्यप्रतिपादकाश्च सन्ति।

**अलङ्काराणां विभाजकं तत्त्वम्-** प्रायः सर्वेऽपि आचार्याः शब्दार्थौ काव्यशरीरं मन्यते। अलङ्कारशरीरस्य शोभाधायकः भवति। अत एव काव्येषु शरीरभूतयोः शब्दार्थयोः उत्कर्षधायकस्य तत्त्वस्य नाम एव अलङ्कारो भवति।अनेन अलङ्कारस्य आधारो शब्दार्थयोः एव भवतः, तस्मात् आचार्ये शब्दालङ्कारः अर्थालङ्कारः एवं तन्निमश्रत्वेन इति त्रिधा अलङ्काराणां कल्पना कृता। तत्र शब्दालङ्कारस्य तथा अर्थालङ्कारस्य भेदाःल शब्दस्य परिवर्तनसहत्वेन परिवर्तनासहत्वेन वा निर्भरा भवति। या शब्दस्य परिवर्तनं कृत्वा तस्य अपरं पर्यायवाचकं शब्दं योजयित्वात् अलङ्कारः न भवति । तत्र शब्दकारणत्वात् शब्दालङ्कारा स्वीकरणीयं तथा च यत्र शब्दपरिवर्तनेनापि तथा पर्ययशब्दयोजनेनापि अलङ्कारस्यावश्यकता भवति। तत्र अलङ्कारः अर्थाश्रितो भवति। अतस्तत्र अर्थालङ्कारो वाच्यं अनेन योऽलह्कारः

शब्दपरिवर्तितं वोढुं न समर्थाः सः शब्दालङ्कारः एवं या शब्दपरिवर्तितवोढुं समर्थः सः अर्थालङ्कारः वोभवति। इति शब्दार्थालङ्कारयोः विभाजकतत्त्वं ।

**अलङ्कारसंख्याविवेचनम्-** अलङ्कारसंख्याविषये शास्त्रेषु मतभेदः पदे पदे दृश्यते। तत्र शब्दालङ्काराणां अर्थालङ्काराणां संख्या मतभेदः यथा–

आचार्यमम्मभट्ट–अर्थालङ्काराणां संख्या[३क] मन्यते तथा च शब्दालङ्काराणां संख्या षड् एवं एकोभयालङ्कारः स्वीकुर्वन्ति । तत्र शब्दालङ्कारेषु आचार्यमम्मटेन 1.वक्रोक्ति, 2.अनुप्रासः, 3.यमकः, 4.श्लेषः, 5.चित्रालङ्कारः, 6.पुनरूक्तवदाभासः। एते षड् अलङ्काराः गणितम्।

मम्मिकामकरन्दामके प्रकरणेऽलङ्कारयोजना तत्र प्रबन्धशतककर्तृमहाकवि–आचार्यरामचन्द्रसूरिविरचितेऽस्मिन् मल्लिकामकरन्दप्रकरणे शब्दालङ्काराणां छटा पदे पदे दृश्यते। कविना ग्रन्थस्य मङ्गलाचरणे एवं शब्दप्रधानेन अनुप्रासालङ्कारेण अलं करोति अतस्तावद् ।

**अनुप्रासालङ्कारः**– अनुप्रासालङ्कारः विषये आचार्यविश्वनाथः स्वीकीये साहित्यदर्पणे लिखति,यत्र–

**अनुप्रासःशब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।**

**छेको व्यञ्जनसंघस्य सकृत्साम्यमनेकधा॥**[5]

अर्थात् स्वरस्य अचवर्णस्य वैषम्येऽपि असामान्येऽपि यत्र शब्दस्यार्थात् व्यञ्जनवर्णस्य वैषम्येऽपि असामान्येऽपि यत्र शब्दस्यार्थात् व्यञ्जनवर्णस्य साम्यं सारूप्यं भवति। तत्र अनुप्रासालङ्काराः इत्यर्थः तस्यानुप्रासस्य पञ्च भेदास्ते यथा– 1.छेकानुप्रासः, 2. वृत्यानुप्रासः, 3.श्रुत्यानुप्रासः, 4.अन्त्यानुप्रासः, 5. लाटानुप्रासः। तत्रादौ आचार्यैः छेकानुप्रासं लक्ष्यति यत्र व्यञ्जनसंघस्य अर्थात् हलवर्णसमूहस्य सकृत् एकवारम् अनेकधा अनेन प्रकारेण साम्यं सादृश्यं भवति ,छेकानुप्रासः स्वीकरणीयम्। अनेन प्रकारेण क्रमाद् वृत्यनुप्रासानां विवेचनम् आचार्यैः कृतम्। तत्र साहिय्यदर्पणे–

**मल्लिकामरन्दप्रकरणे उदाहरणानि-**

**मल्लिकाविशदां लक्ष्मीं प्राय यः शिवसम्भवाम्।**

**प्रत्यूहव्यूहतो मुक्तं तं जिनेशमुपास्महे॥**[6]

श्लोकेऽस्मिन् प्रत्यूहव्यूहतो इत्यत्र पञ्चविधासु अनुप्रासालङ्कारेषु द्वितीयः वृत्यानुप्रासः वर्तते।वाक्येऽस्मिन् अनेकव्यञ्जनसंघस्य यूह यूह इत्यस्य वारद्वयमावृत्तिरागता।

**द्वितीयोदाहरणे मल्लिकामकरन्दप्रकणे यथा-**

**द्वयं द्वयस्य सम्पत्तिर्बीजमाद्यमखण्डितम्।**

**संसारकर्मणां लक्ष्मी प्रशमः शिवशर्मणाम्।।[7]**

श्लोकेऽस्मिन्नपि द्वयं द्वयस्य इत्यत्र द्वय द्वय इत्यनयोः तथा संसारकर्मणाम् प्रशमः शिवशर्मणाम् इत्यत्र सवर्णस्य तथा प्रशमः शिवशर्म अत्र शवर्णस्य एवं कर्मणां शर्मणाम् इत्यत्र णाम् णाम् इत्येतयोरावृत्तिर्जाता अतः अनुप्रासालङ्कारलक्षणानुसारेण स्वरस्य वैषम्येऽपि शब्दसाम्यत्वात् अत्र अनुप्रासालङ्कारो भविष्यति। तृतीयोदाहरमणम्–

**शम्भुस्वयम्भुहरयो हरिणेक्षणामां,**

**येनाक्रियन्त सततं गृहकुम्भदासाः।**

**वाचामगोचरचरित्रपवित्रिताय,**

**तस्मै नमो भगवते कुसुमायुधाय।।[8]**

अस्मिन् श्लोके शम्भुस्वम्भुहरयः इत्यत्र मपूर्वक–भुवर्णस्योच्चारणमागतम् तथा च चरित्रपवित्रिताय इत्यत्र त्रकारस्यावृत्तिरागता। अतः एतस्मादेव कारणात् एकस्य व्यञ्जनस्यैकवारमावृत्तिरागता वृत्यनुप्रासः।

**लाटानुप्रासः-** मल्लिकामकरन्दप्रकरणेऽस्मिन् लाटानुप्रालङ्कारस्य अलङ्कार्यता दरीदृश्यते। लाटानुप्रासविषये मम्मटो वक्ति–

**शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः।**

**पदानां स पदस्यापि वृत्तावन्यत्र तत्र वा।।[9]**

तात्पर्यमात्रभेदेन शब्दानुप्रासे गणितः लाटानुप्रासःभवति। अनेनशब्दगतानुप्रासः लाटानुप्रासः भवति शब्दार्थयोः मध्ये अभेदसत्यपि तात्पर्यमात्रभेदेन लाटानुप्रासः भवति। तल्लानुप्रासः वर्णानां नहि अपितु पदानां साम्यतायां भवति। मल्लिकामकरन्दप्रकरणे यथा–

**पटुभिरपि नोपसर्पति चक्षुभिरयं निष्प्रयोजनो लोकः।**

**तत् किमपि शिक्षणीयं प्रयोजनं येन जगतोऽपि।।[10]**

श्लोकेऽस्मिन् द्वितीये पादे निष्प्रयोजनो शब्दः तथा चतुर्थे पादे प्रयोजनशब्दः आगतः, अतः प्रयेजनशब्दस्यावृत्तिरभवत् लाटानुप्रासालङ्कारानुसारेण यत्र तात्पर्यमात्रतः भेदः, शब्दार्थयोः अभेदेऽपि भवति। तत्रायमलङ्कारः भवति। अतस्तावदित्यत्र प्रयोजनशब्दस्यावृत्तिरागतः तथा शब्दार्थयोः अभेदेऽपि तात्पर्यमागतः भेदः अप्यस्ति, एतस्मात् कारणादित्यत्र लाटानुप्रासः भविष्यति। इतोऽपि–

**सुखं प्रकाश्यते दौःस्थं प्राच्यमारूढवैभवैः।**

**आरूढदौःस्थ्यैर्दुःखेन प्राचीनं वैभवं पुनः।।[11]**

अस्मिन् श्लोके लाटानुप्रासलक्षणानुसारेण शब्दार्थयोर्मध्ये अभेद सत्यपि तात्पर्यमात्रभेदेन लाटानुप्रासः भवति। इत्यत्र आरूढशब्दस्य तथा दौःस्थ्यशब्दस्य च एवं वैभवशब्दस्य च आवृत्तिरागता, एतेषु सर्वेषु शब्देषु शब्दार्थयोर्मध्ये अभेदः किन्तु सम्पूर्णवाक्ये एतेषां शब्दानां तात्पर्यरूपेण भिन्नार्थः भेदो वा समागच्छति। आरूढशब्दः आरूढवैभवैः इत्यत्र वैभवयुक्तः तथा आरूढैस्थैः इत्यत्र आरूढशब्दः दुःखयुक्तः इति तात्पर्यं प्रददाति। अतः शब्दार्थयोमध्ये अभेदेऽपि तात्पर्यरूपेण अत्र वाक्येषु भेदः दरीदृश्यते । अतः अत्र तात्पर्यमात्रभेदत्वात् लाटानुप्रासः भवति। अनेनैव प्रकारेण आचार्यैः शब्दगुम्फनं कृत्वा अनुप्रासालङ्कारस्य छया पदे पदे प्रदर्शितम्।

**सन्दर्भग्रन्थसूची-**


1.ध्वन्यालोकः-2/10
2.वक्रोक्तिजीवितम्-1/6
3.काव्यप्रकाशः-8/67
4.साहित्यदर्पणः-10/1
5.साहित्यदर्पणः-10/3
6.मल्लिकामकरन्दम्-1/1
7. मल्लिकामकरन्दम्-1/3
8.मल्लिकामकरन्दम्-1/13
9.काव्यप्रकाशः-9/81
10.मल्लिकामकरन्दम्-1/2
11.मल्लिकामकरन्दम्-1/21